# Shri Arhan Namasahasrasamuchchayah

# શ્રીઅર્હન્નામસહસ્રસમુચ્ચયઃ

## Document Information

Text title : Arhannamasahasrasamuchchayah by HemachandrachArya Jinasahasranamastotram 4

File name : arhannAmasahasrasamuchchayaH.itx

Category : deities_misc, jaina, sahasranAma

Location : doc_deities_misc

Author : Hemachandracharya

Proofread by : Gautam Vora

Latest update : August 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 29, 2024

*sanskritdocuments.org*

# શ્રીઅર્હન્નામસહસ્રસમુચ્ચયઃ

(શ્રીહેમચન્દ્રાચાર્યવિરચિતઃ)

## અથ શ્રીઅર્હન્નામસહસ્રસમુચ્ચયઃ ।

અર્હં નામાપિ કર્ણાભ્યાં શ‌ૃણ્વન્ વાચા સમુચ્ચરન્ ।
જીવઃ પીવરપુણ્યશ્રીર્લભતે ફલમુત્તમમ્ ॥ ૧॥

અતએવ પ્રતિપ્રાતઃ સમુત્થાય મનીષિભિઃ ।
ભક્ત્યાઽષ્ટાગ્રસહસ્રાર્હન્નામોચ્ચારો વિધીયતે ॥ ૨॥

ૐ શ્રીમાનર્હન્ જિનઃ સ્વામી સ્વયમ્ભૂઃ શમ્ભુરાત્મભૂઃ ।
સ્વયમ્પ્રભુઃ પ્રભુર્ભોક્તા વિશ્વભૂરપુનર્ભવઃ ॥ ૩॥

વિશ્વાત્મા વિશ્વલોકેશો વિશ્વતશ્ચક્ષુરક્ષરઃ ।
વિશ્વવિદ્ વિશ્વવિદ્યેશો વિશ્વયોનિરનીશ્વરઃ ॥ ૪॥

વિશ્વદૃશ્વા વિભુર્ધાતા વિશ્વેશો વિશ્વલોચનઃ ।
વિશ્વવ્યાપી વિધુર્વેધાઃ શાશ્વતો વિશ્વતોમુખઃ ॥ ૫॥

વિશ્વપો વિશ્વતઃ પાદો વિશ્વશીર્ષઃ શુચિશ્રવાઃ ।
વિશ્વદૃગ્ વિશ્વભૂતેશો વિશ્વજ્યોતિરનશ્વરઃ ॥ ૬॥

વિશ્વસૃટ્ વિશ્વસૂર્વિશ્વેટ્ વિશ્વભુક્ વિશ્વનાયકઃ ।
વિશ્વાશી વિશ્વભૂતાત્મા વિશ્વજિદ્ વિશ્વપાલકઃ ॥ ૭॥

વિશ્વકર્મા જગદ્વિશ્વો વિશ્વમૂર્ત્તિર્જિનેશ્વરઃ ।
ભૂતભાવિભવદ્ભર્ત્તા વિશ્વવૈદ્યો યતીશ્વરઃ ॥ ૮॥

સર્વાદિઃ સર્વદૃક્ સાર્વઃ સર્વજ્ઞઃ સર્વદર્શનઃ ।
સર્વાત્મા સર્વલોકેશઃ સર્વવિત્ સર્વલોકજિત્ ॥ ૯॥

સર્વગઃ સુશ્રુતઃ સુશ્રૂઃ સુવાક્ સૂરિબહુશ્રુતઃ ।

સહસ્રશીર્ષઃ ક્ષેત્રજ્ઞઃ સહસ્રાક્ષઃ સહસ્રપાત્ ॥ ૧૦॥

યુગાદિપુરુષો બ્રહ્મા પઞ્ચબ્રહ્મમયઃ શિવઃ ।
બ્રહ્મવિદ્ બ્રહ્મતત્ત્વજ્ઞો બ્રહ્મયોનિરયોનિજઃ ॥ ૧૧॥

બ્રહ્મનિષ્ઠઃ પરબ્રહ્મ બ્રહ્માત્મા બ્રહ્મસમ્ભવઃ ।
બ્રહ્મ બ્રહ્મપતિર્બ્રહ્મચારી બ્રહ્મપદેશ્વરઃ ॥ ૧૨॥

વિષ્ણુર્જિષ્ણુર્જયી જેતા જિનેન્દ્રો જિનપુઙ્ગવઃ ।
પરઃ પરતરઃ સૂક્ષ્મઃ પરમેષ્ઠી સનાતનઃ ॥ ૧૩॥

## ॥ ૧૦૦॥

જિનનાથો જગન્નાથો જગત્સ્વામી જગત્પ્રભુઃ ।
જગત્પૂજ્યો જગદ્વન્દ્યો જગદીશો જગત્પતિઃ ॥ ૧૪॥

જગન્નેતા જગજ્જેતા જગન્માન્યો જગદ્વિભુઃ ।
જગજ્જ્યેષ્ઠો જગચ્છ્રેષ્ઠો જગદ્ધ્યેયો જગદ્ધિતઃ ॥ ૧૫॥

જગદર્ચ્યો જગદ્બન્ધુર્જગચ્છાસ્તા જગત્પિતા ।
જગન્નેત્રો જગન્મૈત્રો જગડીપો જગદ્ગુરુઃ ॥ ૧૬॥

સ્વયઞ્જ્યોતિરજોઽજન્મા પરન્તેજઃ પરમ્મહઃ ।
પરમાત્મા શમી શાન્તઃ પરઞ્જ્યોતિસ્તમોઽપહઃ ॥ ૧૭॥

પ્રશાન્તારિરનન્તાત્મા યોગી યોગીશ્વરો ગુરુઃ ।
અનન્તજિદનન્તાત્મા ભવ્યબન્ધુરબન્ધનઃ ॥ ૧૮॥

શુદ્ધબુદ્ધિઃ પ્રબુદ્ધાત્મા સિદ્ધાર્થઃ સિદ્ધશાસનઃ ।
સિદ્ધઃ સિદ્ધાન્તવિદ્ ધ્યેયઃ સિદ્ધઃ સાધ્યઃ સુધીઃ સુગીઃ ॥ ૧૯॥

સહિષ્ણુરચ્યુતોઽનન્તઃ પ્રભવિષ્ણુર્ભવોદ્ભવઃ ।
સ્વયમ્ભૂષ્ણુરસમ્ભૂષ્ણુઃ પ્રભૂષ્ણુરભયોઽવ્યયઃ ॥ ૨૦॥

દિવ્યભાષાપતિર્દિવ્યઃ પૂતવાક્ પૂતશાસનઃ ।
પૂતાત્મા પરમજ્યોતિર્ધર્માધ્યક્ષ્યો દમીશ્વરઃ ॥ ૨૧॥

નિર્મોહો નિર્મદો નિઃસ્વો નિર્દમ્ભો નિરુપદ્રવઃ ।
નિરાધારો નિરાહારો નિર્લોભો નિશ્ચલોઽચલઃ ॥ ૨૨॥

નિષ્કામી નિર્મમો નિષ્વક્ નિષ્કલઙ્કો નિરઞ્જનઃ ।
નિર્ગુણો નીરસો નિર્ભીર્નિર્વ્યાપારો નિરામયઃ ॥ ૨૩॥

નિર્નિમેષો નિરાબાધો નિર્દ્વન્દ્વો નિષ્ક્રિયોઽનઘઃ ।
નિઃશઙ્કશ્ચ નિરાતઙ્કો નિષ્કલો નિર્મલોઽમલઃ ॥ ૨૪॥

## ॥ ૨૦૦॥

તીર્થકૃત્ તીર્થસૃટ્ તીર્થઙ્કરસ્તીર્થઙ્કરઃ સુદૃક્ ।
તોર્થકર્ત્તા તીર્થભર્ત્તા તીર્થેશસ્તીર્થનાયકઃ ॥ ૨૫॥

સુતીર્થોઽધિપતિતીર્થસેવ્યસ્તીર્થિકનાયકઃ ।
ધર્મતીર્થકરસ્તીર્થપ્રણેતા તીર્થકારકઃ ॥ ૨૬॥

તીર્થાધીશો મહાતોર્થસ્તીર્થસ્તીર્થવિધાયકઃ ।
સત્યતીર્થઙ્કરસ્તીર્થસેવ્યસ્તીર્થિકતાયકઃ ॥ ૨૭॥

તીર્થનાથસ્તીર્થરાજસ્તીર્થેટ્ તીર્થપ્રકાશકઃ ।
તીર્થવન્દ્યસ્તીર્થમુખ્યસ્તીર્થારાધ્યઃ સુતીર્થિકઃ ॥ ૨૮॥

સ્થવિષ્ઠઃ સ્થવિરો જ્યેષ્ઠઃ પ્રેષ્ઠઃ પ્રષ્ઠો વરિષ્ઠધીઃ ।
સ્થેષ્ઠો ગરિષ્ઠો વંહિષ્ઠો શ્રેષ્ઠોઽણિષ્ઠો ગરિષ્ઠધીઃ ॥ ૨૯॥

વિભવો વિભયો વીરો વિશોકો વિરજો જરન્ ।
વિરાગો વિમદોઽવ્યક્તો વિવિક્તો વીતમત્સરઃ ॥ ૩૦॥

વીતરાગો ગતદ્વષો વીતમોહો વિમન્મથઃ ।
વિયોગો યોગવિદ્ વિદ્વાન્ વિધાતા વિનયી નયી ॥ ૩૧॥

ક્ષાન્તિમાન્ પૃથિવીમૂર્ત્તિઃ શાન્તિભાક્ સલિલાત્મકઃ ।
વાયુમૂર્ત્તિરસઙ્ગાત્મા વહ્નિમૂર્તિરધર્મધક્ ॥ ૩૨॥

સુયજ્વા યજમાનાત્મા સુત્રામસ્તોમપૂજિતઃ ।
ઋત્વિગ્ યજ્ઞપતિર્યાજ્યો યજ્ઞાઙ્ગમસ્તં હવિઃ ॥ ૩૩॥

સોમમૂર્ત્તિઃ સૌમ્યાત્મા સૂર્યમૂર્તિર્મહાપ્રભઃ ।
વ્યોમમૂર્ત્તિરમૂર્ત્તાત્મા નીરજા વીરજાઃ શુચિઃ ॥ ૩૪॥

મન્ત્રવિન્મન્ત્રકૃન્મન્ત્રી મન્ત્રમૂર્ત્તિરનન્તરઃ ।
સ્વતન્ત્રઃ સૂત્રકૃત્ સ્વત્રઃ કૃતાન્તશ્ચ કૃતાન્તકૃત્ ॥ ૩૫॥

## ॥ ૩૦૦ ॥

કૃતી કૃતાર્થઃ સંસ્કૃત્યઃ કૃતકૃત્યઃ કૃતક્રતુઃ ।
નિત્યો મૃત્યુઞ્જયોઽમૃત્યુરમૃતાત્માઽમૃતોદ્ભવઃ ॥ ૩૬ ॥

હિરણ્યગર્ભઃ શ્રીગર્ભઃ પ્રભૂતવિભવોઽભવઃ ।
સ્વયમ્પ્રભઃ પ્રભૂતાત્મા ભવો ભાવો ભવાન્તકઃ ॥ ૩૭ ॥

મહાશોકધ્વજોઽશોકઃ કઃ સ્રષ્ટા પદ્મવિષ્ટરઃ ।
પદ્મેશઃ પદ્મસમ્ભૂતિઃ પદ્મનાભિરનુત્તરઃ ॥ ૩૮ ॥

પદ્મયોનિર્જગદ્યોનિરિત્યઃ સ્તુત્યઃ સ્તુતીશ્વરઃ ।
સ્તવનાર્હો હૃષીકેશોઽજિતો જેયઃ કૃતક્રિયઃ ॥ ૩૯ ॥

વિશાલો વિપુલજ્યોતિરતુલોઽચિન્ત્યવૈભવઃ ।
સુસંવૃત્તઃ સુગુપ્તાત્મા શુભંયુઃ શુભકર્મકૃત્ ॥ ૪૦ ॥

એકવિદ્યો મહાવૈદ્યો મુનિઃ પરિવૃઢો દૃઢઃ ।
પતિર્વિદ્યાનિધિઃ સાક્ષી વિનેતા વિતાન્તકઃ ॥ ૪૧ ॥

પિતા પિતામહઃ પાતા પવિત્રઃ પાવનો ગતિઃ ।
ત્રાતા ભિષગ્વરો વર્યો વરદઃ પારદઃ પુમાન્ ॥ ૪૨ ॥

કવિઃ પુરાણપુરુષો વર્ષીયાન્ ઋષભઃ પુરઃ ।
પ્રતિષ્ઠાપ્રસવો હેતુર્ભુવનૈકપિતામહઃ ॥ ૪૩ ॥

શ્રીવત્સલક્ષણઃશ્લક્ષણો લક્ષણ્યઃ શુભલક્ષણઃ ।
નિરક્ષઃ પુણ્ડરીકાક્ષઃ પુષ્કલઃ પુષ્કલેક્ષણઃ ॥ ૪૪ ॥

સિદ્ધિદઃ સિદ્ધસઙ્કલ્પઃ સિદ્ધાત્મા સિદ્ધશાસનઃ ।
બુદ્ધબોધ્યો મહાબુદ્ધિર્વર્ધમાનો મહર્દ્ધિકઃ ॥ ૪૫ ॥

વેદાઙ્ગો વેદવિદ્ વેદ્યો જાતરૂપો વિદાંવરઃ ।
વેદવેદ્યઃ સ્વસંવેદ્યો વિવેદો વદતાંવરઃ ॥ ૪૬ ॥

## ॥ ૪૦૦ ॥

સુધર્મા ધર્મધીર્ધર્મો ધર્માત્મા ધર્મદેશકઃ ।
ધર્મચક્રી દયાધર્મઃ શુદ્ધધર્મો વૃષધ્વજઃ ॥ ૪૭ ॥

વૃષકેતુર્વૃષાધીશો વૃષાઙ્કશ્ચ વૃષોદ્ભવઃ ।
હિરણ્યનાભિર્ભૂતાત્મા ભૂતભૃદ્ ભૂતભાવનઃ ॥ ૪૮ ॥

પ્રભવો વિભવો ભાસ્વાન્ મુક્તઃ શક્તોઽક્ષયોઽક્ષતઃ ।
કૂટસ્થઃ સ્થાણુરક્ષોભ્યઃ શાસ્તા નેતાઽચલ સ્થિતિઃ ॥ ૪૯ ॥

અગ્રણીર્ગ્રામણીર્ગ્રણ્યો ગણ્યગણ્યો ગણાગ્રણીઃ ।
ગણાધિપો ગણાધીશો ગણજ્યેષ્ઠો ગણાર્ચિતઃ ॥ ૫૦ ॥

ગુણાકરો ગુણામ્ભોધિર્ગુણજ્ઞો ગુણવાન્ ગુણી ।
ગુણાદરો ગુણોચ્છેદી સુગુણોઽગુણવર્જિતઃ ॥ ૫૧ ॥

શરણ્યઃ પુણ્યવાક્ પૂતો વરેણ્યઃ પુણ્યગોર્ગુણઃ ।
અગણ્યપુણ્યધોઃ પુણ્યઃ પુણ્યકૃત્ પુણ્યશાસનઃ ॥ ૫૨ ॥

અતીન્દ્રોઽતીન્દ્રિયોઽધીન્દ્રો મહેન્દ્રોઽતીન્દ્રિયાર્થદૃક્ ।
અતીન્દ્રિયો મહેન્દ્રાર્ચ્યો મહેન્દ્રમહિતો મહાન્ ॥ ૫૩ ॥

ઉદ્ભવઃ કારણં કર્ત્તા પારગો ભવતારકઃ ।
અગ્રાહ્યો ગહનં ગુહ્યઃ પરર્દ્ધિઃ પરમેશ્વરઃ ॥ ૫૪ ॥

અનન્તર્દ્ધિરમેયર્દ્ધિરચિન્ત્યર્દ્ધિઃ સમગ્રધીઃ ।
પ્રાગ્ર્યઃ પ્રાગ્ર્યહરોઽત્યગ્રઃ પ્રત્યગ્રોઽગ્રોઽગ્રિમોઽગ્રજઃ ॥ ૫૫ ॥

પ્રાણકઃ પ્રણવઃ પ્રાણઃ પ્રાણદઃ પ્રાણિતેશ્વરઃ ।
પ્રધાનમાત્મા પ્રકૃતિઃ પરમઃ પરમોદયઃ ॥ ૫૬ ॥

## ॥ ૫૦૦ ॥

મહાજિનો મહાબુદ્ધો મહાબ્રહ્મા મહાશિવઃ ।
મહાવિષ્ણુર્મહાજિદણુર્મહાનાથો મહેશ્વરઃ ॥ ૫૭ ॥

મહાદેવો મહાસ્વામી મહારાજો મહાપ્રભુઃ ।
મહાચન્દ્રો મહાદિત્યો મહાશૂરો મહાગુરુઃ ॥ ૫૮ ॥

મહાતપા મહાતેજા મહોદર્કો મહામયઃ ।
મહાયશો મહાધામા મહાસત્ત્વો મહાબલઃ ॥ ૫૯॥

મહાધૈર્યો મહાવીર્યો મહાકાન્તિર્મહાદ્યુતિઃ ।
મહાશક્તિર્મહાજ્યોતિર્મહાભૂતિર્મહાધૃતિઃ ॥ ૬૦॥

મહામતિર્મહાનીતિર્મહાક્ષાન્તિર્મહાકૃતિઃ ।
મહાકીર્ત્તિર્મહાસ્ફૂર્તિર્મહાપ્રજ્ઞો મહોદયઃ ॥ ૬૭॥

મહાભાગો મહાભોગો મહારૂપો મહાવપુઃ ।
મહાદાનો મહાજ્ઞાનો મહાશાસ્તા મહામહઃ ॥ ૬૮॥

મહામુનિર્મહામૌની મહાધ્યાનો મહાદમઃ ।
મહાક્ષમો મહાશીલો મહાયોગો મહાલયઃ ॥ ૬૯॥

મહાવ્રતો મહાયજ્ઞો મહાશ્રેષ્ઠો મહાકવિઃ ।
મહામન્ત્રો મહાતન્ત્રો મહોપાયો મહાનયઃ ॥ ૭૦॥

મહાકારુણિકો મન્તા મહાનાદો મહાયતિઃ ।
મહામોદો મહાઘોષો મહેજ્યો મહસામ્પતિઃ ॥ ૭૧॥

મહાવીરો મહાધીરો મહાધુર્યો મહેષ્ઠવાક્ ।
મહાત્મા મહસાં ધામ મહર્ષિર્મહિતોદયઃ ॥ ૭૨॥

મહામુક્તિર્મહાગુપ્તિર્મહાસત્યો મહાર્જવઃ ।
મહાબુદ્ધિર્મહાસિદ્ધિર્મહાશૌચો મહાવશી ॥ ૭૩॥

મહાધર્મા મહાશર્મા મહાત્મજ્ઞો મહાશયઃ ।
મહામોક્ષો મહાસૌખ્યો મહાનન્દો મહોદયઃ ॥ ૭૪॥

॥ ૬૦૦॥

મહાભવાબ્ધિસન્તારી મહામોહારિસૂદનઃ ।
મહાયોગીશ્વરારાધ્યો મહામુક્તિપદેશ્વરઃ ॥ ૭૫॥

આનન્દો નન્દનો નન્દો વન્દ્યો નન્દ્યોઽભિનન્દનઃ ।
કામહા કામદઃ કામ્યઃ કામધેનુરરિઞ્જયઃ ॥ ૭૬॥

મનઃક્લેશાપહઃ સાધુરુત્તમોઽઘહરો હરઃ ।
અસઙ્ખ્યેયઃ પ્રમેયાત્મા શમાત્મા પ્રશમાકરઃ ॥ ૭૭॥

સર્વયોગીશ્વરશ્ચિન્ત્યઃ શ્રુતાત્મા વિષ્ટરશ્રવાઃ ।
દાન્તાત્મા દમતીર્થેશો યોગાત્મા યોગસાધકઃ ॥ ૭૮॥

પ્રમાણપરિધિર્દક્ષો દક્ષિણોઽધ્વર્યુરધ્વરઃ ।
પ્રક્ષીણબન્ધઃ કર્મારિઃ ક્ષેમકૃત્ક્ષેમશાસનઃ ॥ ૭૯॥

ક્ષેમી ક્ષેમઙ્કરોઽક્ષય્યઃ ક્ષેમધર્મા ક્ષમાપતિઃ ।
અગ્રાહ્યો જ્ઞાનિવિજ્ઞેયો જ્ઞાનિગમ્યો જિનોત્તમઃ ॥ ૮૦॥

જિનેન્દુર્જનિતાનન્દો મુનીન્દુર્દુન્દુભિસ્વનઃ ।
મુનીન્દ્રવન્દ્યો યોગીન્દ્રો યતીન્દ્રો યતિનાયકઃ ॥ ૮૧॥

અસંસ્કૃતઃ સુસંસ્કારઃ પ્રાકૃતો વૈકૃતાન્તવિત્ ।
અન્તકૃત્ કાન્તગુઃ કાન્તશ્ચિન્તામણિરભીષ્ટદઃ ॥ ૮૨॥

અજિતો જિતકામારિરમિતોઽમિતશાસનઃ ।
જિતક્રોધો જિતામિત્રો જિતક્લેશો જિતાન્તકઃ ॥ ૮૩॥

સત્યાત્મા સત્યવિજ્ઞાનઃ સત્યવાક્ સત્યશાસનઃ ।
સત્યાશીઃ સત્યસન્ધાનઃ સત્યઃ સત્યપરાયણઃ ॥ ૮૪॥

સદાયોગઃ સદાભોગઃ સદાતૃપ્તઃ સદાશિવઃ ।
સદાગતિઃ સદાસૌખ્યઃ સદાવિદ્યઃ સદોદયઃ ॥ ૮૫॥

સુઘોષઃ સુમુખઃ સૌમ્યઃ સુખદઃ સુહિતઃ સુહૃત્ ।
સુગુપ્તો ગુપ્તિભૃદ્ ગોપ્તા ગુપ્તાક્ષો ગુપ્તમાનસઃ ॥ ૮૬॥

## ॥ ૭૦૦॥

બૃહદ્ બૃહસ્પતિર્વાગ્મી વાચસ્પતિરુદારધીઃ ।
મનીષી ધિષણો ધીમાન્ શેમુષીશો ગિરામ્પતિઃ ॥ ૮૭॥

નૈકરૂપો નયોત્તુઙ્ગો નૈકાત્મા નૈકધર્મકૃત્ ।
અવિજ્ઞેયોઽપ્રતર્ક્યાત્મા કૃતજ્ઞઃ કૃતલક્ષણઃ ॥ ૮૮॥

જ્ઞાનગર્ભો દયાગર્ભો રત્નગર્ભઃ પ્રભાસ્વરઃ ।
પદ્મગર્ભો જગદ્ગર્ભો હેમગર્ભઃ સુદર્શનઃ ॥ ૮૯॥

લક્ષ્મીશઃ સદયોઽધ્યક્ષો દૃઢયોનિર્નગીશિતા ।

મનોહરો મનોજ્ઞોઽર્હો ધીરો ગમ્ભીરશાસનઃ ॥ ૯૦॥

ધર્મયૂપો દયાયાગો ધર્મનેમિર્મુનીશ્વરઃ ।
ધર્મચક્રાયુધી દેવઃ કર્મહા ધર્મઘોષણઃ ॥ ૯૧॥

સ્થેયાન્ સ્થવીયાન્ નેદીયાન્ દવીયાન્ દૂરદર્શનઃ ।
સુસ્થિતઃ સ્વાસ્થ્યભાક્ સુસ્થો નીરજસ્કો ગતસ્પૃહઃ ॥ ૯૨॥

વશ્યેન્દ્રિયો વિમુક્તાત્મા નિઃસપત્નો જિતેન્દ્રિયઃ ।
શ્રીનિવાસશ્ચતુર્વક્ત્રશ્ચતુરાસ્યશ્ચતુર્મુખઃ ॥ ૯૩॥

અધ્યાત્મગમ્યોઽગમ્યાત્મા યોગાત્મા યોગિવન્દિતઃ ।
સર્વત્રગઃ સદાભાવી ત્રિકાલવિષયાર્થદૃક્ ॥ ૯૪॥

શઙ્કરઃ સુખદો દાન્તો દમી ક્ષાન્તિપરાયણઃ ।
સ્વાનન્દઃ પરમાનન્દઃ સૂક્ષ્મવર્ચાઃ પરાપરઃ ॥ ૯૫॥

અમોઘોઽમોઘવાક્ સ્વાજ્ઞો દિવ્યદૃષ્ટિગોચરઃ ।
સુરૂપઃ સુભગસ્ત્યાગી મૂર્તોઽમૂર્તઃ સમાહિતઃ ॥ ૯૬॥

॥ ૮૦૦॥

એકોઽનેકો નિરાલમ્બોઽનીદૃગ્ નાથો નિરન્તરઃ ।
પ્રાર્થ્યોઽભ્યર્થ્યઃ સમભ્યર્ચ્યસ્ત્રિજગન્મઙ્ગલોદયઃ ॥ ૯૭॥

ઈશોઽધીશોઽધિપોઽધીન્દ્રો ધ્યેયોઽમેયો દયામયઃ ।
શિવઃ શૂરઃ શુભઃ સારઃ શિષ્ટઃ સ્પષ્ટઃ સ્ફુટોઽસ્ફુટઃ ॥ ૯૮॥

ઇષ્ટઃ પુષ્ટઃ ક્ષમોઽક્ષામોઽકાયોઽમાયોઽસ્મયોઽમયઃ ।
દૃશ્યોઽદૃશ્યોઽણુરસ્થૂલો જીર્ણો નવ્યો ગુરુર્લઘુઃ ॥ ૯૯॥

સ્વભૂઃ સ્વાત્મા સ્વયમ્બુદ્ધઃ સ્વેશઃ સ્વૈરીશ્વરઃ સ્વરઃ ।
આદ્યોઽલચયોઽપરોઽરૂપોઽસ્પર્શોઽશાષ્ટોઽરિહાઽરુહઃ ॥ ૧૦૦॥

દીપ્તોઽલેશ્યોઽરસોઽગન્ધોઽચ્છેદ્યોઽભેદ્યોઽજરોઽમરઃ ।
પ્રાજ્ઞો ધન્યો યતિઃ પૂજ્યો મહ્યોઽર્ચ્યઃ પ્રશમી યમી ॥ ૧૦૧॥

શ્રીશઃ શ્રીન્દ્રઃ શુભઃ સુશ્રીરુત્તમશ્રીઃ શ્રિયઃ પતિઃ ।
શ્રીપતિઃ શ્રીપરઃ શ્રીપઃ સચ્છ્રીઃ શ્રીયુક્ શ્રિયાશ્રિતઃ ॥ ૧૦૨॥

જ્ઞાની તપસ્વી તેજસ્વી યશસ્વી બલવાન્ બલી ।
દાની ધ્યાની મુનિર્મૌન્રી લયી લક્ષ્યઃ ક્ષયી ક્ષમી ॥ ૧૦૩ ॥

લક્ષ્મીવાન્ ભગવાન્ શ્રેયાન્ સુગતઃ સુતનુર્બુધઃ ।
બુધ્દો વૃધ્દઃ સ્વયંસિધ્દઃ પ્રોચ્ચઃ પ્રાંશુઃ પ્રભામયઃ ॥ ૧૦૪ ॥

## ॥ ૯૦૦ ॥

આદિદેવો દેવદેવઃ પુરુદેવોऽધિદેવતા ।
યુગાદીશો યુગાધીશો યુગમુખ્યો યુગોત્તમઃ ॥ ૧૦૫ ॥

દીપ્તઃ પ્રદીપ્તઃ સૂર્યાભોऽરિઘ્નોऽવિઘ્નોऽઘનો ઘનઃ ।
શત્રુઘ્નઃ પ્રતિઘસ્તુઙ્ગોऽસઙ્ગઃ સ્વઙ્ગોऽગ્રગઃ સુગઃ ॥ ૧૦૬ ॥

સ્યાદ્વાદી દિવ્યગીર્દિવ્યધ્વનિરુદ્દામગીઃ પ્રગીઃ ।
પુણ્યવાગર્ચ્યવાગર્ધમાગધીયોક્તિરિધ્દગીઃ ॥ ૧૦૭ ॥

પુરાણપુરુષોऽપૂર્વોऽપૂર્વશ્રીઃ પૂર્વદેશકઃ ।
જિનદેવો જિનાધીશો જિનનાથો જિનાગ્રણીઃ ॥ ૧૦૮ ॥

શાન્તિનિષ્ઠો મુનિજ્યેષ્ઠઃ શિવતાતિઃ શિવપ્રદઃ ।
શાન્તિકૃત્ શાન્તિદઃ શાન્તિઃ કાન્તિમાન્ કામિતપ્રદઃ ॥ ૧૦૯ ॥

શ્રિયાન્નિધિરધિષ્ઠાનમપ્રતિષ્ઠઃ પ્રતિષ્ટિતઃ ।
સુસ્થિતઃ સ્થાવરઃ સ્થાણુઃ પૃથીયાન્ પ્રથિતઃ પૃથુઃ ॥ ૧૧૦ ॥

પુણ્યરાશિઃ શ્રિયોરાશિસ્તે જોરાશિરસંશયી ।
જ્ઞાનોદધિરનન્તૌજા જ્યોતિમૂર્ત્તિરનન્તધીઃ ॥ ૧૧૧ ॥

વિજ્ઞાનોऽપ્રતિમો ભિક્ષુર્મુક્ષુર્મુનિપુઙ્ગવઃ ।
અનિદ્રાલુરતન્દ્રાલુર્જાગરૂકઃ પ્રમામયઃ ॥ ૧૧૨ ॥

કર્મણ્યઃ કર્મઠોऽકુણ્ઠો રુદ્રો ભદ્રોऽભયઙ્કરઃ ।
લોકોત્તરો લોકપતિર્લોકેશો લોકવત્સલઃ ॥ ૧૧૩ ॥

ત્રિલોકીશસ્ત્રિકાલજ્ઞાસ્ત્રિનેત્રસ્ત્રિપુરાન્તકઃ ।
ત્ર્યમ્બકઃ કેવલાલોકઃ કેવલી કેવલેક્ષણઃ ॥ ૧૧૪ ॥

સમન્તભદ્રઃ શાન્તાદિર્ધર્માચાર્યો દયાનિધિઃ ।
સૂક્ષ્મદર્શી સુમાર્ગજ્ઞઃ કૃપાલુર્માર્ગર્શકઃ ॥ ૧૧૫ ॥

## ॥ ૧૦૦૮ ॥

પ્રાતિહાર્યોજ્જ્વલસ્ફીતાતિશયો વિમલાશયઃ ।
સિદ્ધાનન્તચતુષ્કશ્રીર્જીયાચ્છ્રીજિનપુઙ્ગવઃ ॥ ૧૧૬ ॥

એતદષ્ટોત્તરં નામસહસ્રં શ્રીમદર્હતઃ ।
ભવ્યાઃ પઠન્તુ સાનન્દં મહાનન્દૈકકારણમ્ ॥ ૧૧૭ ॥

ઇત્યેતજ્જિનદેવસ્ય જિનનામસહસ્રકમ્ ।
સર્વાપરાધશમનં પરં ભક્તિવિવર્ધનમ્ ॥ ૧૧૮ ॥

અક્ષયં ત્રિષુ લોકેષુ સર્વસ્વર્ગૈકસાધનમ્ ।
સ્વર્ગલોકૈકસોપાનં સર્વદુઃખૈકનાશનમ્ ॥ ૧૧૯ ॥

સમસ્તદુઃખહં સદ્યઃ પરં નિર્વાણદાયકમ્ ।
કામક્રોધાદિનિઃશેષમનોમલવિશોધનમ્ ॥ ૧૨૦ ॥

શાન્તિદં પાવનં નૃણાં મહાપાતકનાશનમ્ ।
સર્વેષાં પ્રાણિનામાશુ સર્વાભીષ્ટફલપ્રદમ્ ॥ ૧૨૧ ॥

જગજ્જાડ્યપ્રશમનં સર્વવિદ્યાપ્રવર્ત્તકમ્ ।
રાજ્યદં રાજ્યભ્રષ્ટાનાં રોગિણાં સર્વરોગહૃત્ ॥ ૧૨૨ ॥

વન્ધ્યાનાં સુતદં ચાશુ ક્ષીણાનાં જીવિતપ્રદમ્ ।
ભૂત-ગ્રહ-વિષધ્વંસિ શ્રવણાત્ પઠનાજ્જપાત્ ॥ ૧૨૩ ॥

ઇતિ શ્રીહેમચન્દ્રાચાર્યવિરચિતઃ શ્રીઅર્હન્નામસહસ્રસમુચ્ચયઃ સમાપ્તઃ ।

Proofread by Gautam Vora

*Shri Arhan Namasahasrasamuchchayah*
pdf was typeset on August 29, 2024

Please send corrections to *sanskrit@cheerful.com*